सर्वज्वर विनाशाय सर्वरोगापहारिणे ॥ ४९॥

सर्वाभिचार हन्त्रे च सर्वोत्पात विघातिने ।
पिङ्गाक्षायैक शृङ्गाय द्विशृङ्गाय मरीचये ॥ ५०॥

बहुशृङ्गाय लिङ्गाय महाशृङ्गाय ते नमः ।
माङ्गल्याय मनोज्ञाय मन्तव्याय महात्मने ॥ ५१॥

महादेवाय देवाय मातुलुङ्ग धराय च ।
महामाया प्रसूताय मायिने जलशायिने ॥ ५२॥

महोदराय मन्दाय मदनाय मदाय च ।
मधुकैटभहन्त्रे च माधवाय मुरारये ॥ ५३॥

महावीर्याय धैर्याय चित्रवार्याय ते नमः ।
चित्रकर्माय चित्राय नमस्ते चित्रभानवे ॥ ५४॥

मायातीताय मायाय महावीराय ते नमः ।
महातेजाय बीजाय तेजोधाम्ने च बीजिने ॥ ५५॥

तेजोमय नृसिंहाय तेजसां निधये नमः ।
महादंष्ट्राय तुष्टाय नमः पुष्टिकराय च ॥ ५६॥

शिपिविष्टाय हृष्टाय पुष्टाय परमेष्ठिने ।
विशिष्टाय च शिष्टाय गरिष्ठायेष्टदायिने ॥ ५७॥

नमो ज्येष्ठाय श्रेष्ठाय तुष्टायामित तेजसे ।
अष्टाङ्ग न्यस्त रूपाय सर्वदुष्टान्तकाय च ॥ ५८॥

बहुयोजन विस्तीर्णं बहुयोजन मायतम् ।
बहुयोजन हस्ताङ्घ्रिं बहुयोजन नासिकम् ॥ ७८॥

महारूपं महावक्त्रं महादंष्ट्रं महाभुजम् ।
महानादं महारौद्रं महाकायं महाबलम् ॥ ७९॥

आनाभे र्ब्रह्मणोरूपं आगलाद्वैष्णवं तथा ।
आशीर्षाद्रौद्रमीशानं तदग्रे सर्वतः शिवम् ॥ ८०॥

नमोऽस्तु नारायण नारसिंह नमोऽस्तु नारायण वीरसिंह ।
नमोऽस्तु नारायण क्रूरसिंह नमोऽस्तु नारायण दिव्यसिंह ॥ ८१॥

नमोऽस्तु नारायण व्याघ्रसिंह नमोऽस्तु नारायण पुच्छसिंह ।
नमोऽस्तु नारायण पूर्णसिंह नमोऽस्तु नारायण रौद्रसिंह ॥ ८२॥

नमो नमो भीषण भद्रसिंह नमो नमो विह्वल नेत्रसिंह ।
नमो नमो बृंहित भूतसिंह नमो नमो निर्मल चित्तसिंह ॥ ८३॥

नमो नमो निर्जित कालसिंह नमो नमः कल्पित कल्पसिंह ।
नमो नमो कामद कामसिंह नमो नमस्ते भुवनैक सिंह ॥ ८४॥

द्यावापृथिव्यो रिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ।
दृष्ट्वाद्भुतं रूपमुदग्र वेगं लोकत्रयं प्रव्यथितं महात्मन् ॥ ८५॥

अमी हित्वा सुरसङ्घा विशन्ति केचिद्भीताः प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा मुनयः सिद्धसङ्घाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः॥ ८६॥

रुद्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरुतश्चोष्मपाश्च ।

